No. of Printed Pages/Questions: 10 / 18

# O. P. JINDAL SCHOOL, SAVITRI NAGAR

## Half Yearly Examination (2023 – 2024)

**Class / Section: VII** **MM : 80**
**Subject: Sanskrit** **Time : 3.Hrs.**
Name: ____________ Roll No.:__________

***(Fifteen Minutes Extra will be given for reading the Question Paper.)***

*General Instructions: All questions are compulsory*

निर्देशाः1) प्रश्नपत्रे चत्वारि खण्डानि सन्ति।

| | | |
|---|---|---|
| खण्ड क | अपठित अवबोधनम् | (10 अङ्काः) |
| खण्ड ख | रचनात्मकं कार्यम् | (15 अङ्काः) |
| खण्ड ग | अनुप्रयुक्त व्याकरणम् | (25 अङ्काः) |
| खण्ड घ | पठित–अवबोधनम् | (30 अङ्काः) |

2) सर्वे प्रश्नाः अनिवार्याः।
3) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।
4) प्रश्न संख्या अवश्यं लेखनीया।
5) उत्तराणि संस्कृतेन एव लेखनीयानि।

---

## (खण्ड–क) अपठित–अवबोधनम्

**प्र0 1 अधोलिखितम् अनुच्छेदं ध्यानेन पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत–**

लालालाजपतरायः लवपुरे सायमनकमीशनस्य विरोधे प्रदर्शनस्य नेतृत्वम् अकरोत्। तदा आरक्षिदलस्य एकः कर्ता तस्य उपरि तीव्रयष्टिप्रहारम् अकरोत्। यष्टिप्रहारेण सः कालान्तरे पंचत्वम् गतः। तदा भगत सिंहः तस्य सहयोगी जनाः च तस्य प्रतीकाराय संकल्पम् अकुर्वन्।

**I एकपदेन उत्तरत–** **(1X3=3)**

i प्रदर्शनस्य नेता कः आसीत् ?

ii लालालाजपतरायः कस्य प्रहारेण मृतः ?

iii प्रतीकाराय भगत सिंहः किम् अकरोत् ?

**II पूर्णवाक्येन उत्तरत–** **(2X2=4)**

i लालालाजपतरायः कथम् अमरत् ?

ii लालालाजपतरायः लवपुरे किम् अकरोत् ?

**III गद्यांशस्य एकं शीर्षकं लिखत–** (गद्यांश का एक शीर्षक लिखिए।) **(1X1=1)**

**IV यथानिर्देशम् उत्तरत–** (निर्देशानुसार उत्तर दीजिए।) (1X2=2)

समुचितम् अर्थम् लिखत–

i 'कालान्तरे' ————————————

ii 'पंचत्वम्' ————————————

## (खण्ड–ख) रचनात्मकं–कार्यम्

**प्र0 2 सद्वृत्तिः प्रमाणपत्राय आचार्यं प्रति लिखितं–पत्रं पुनः लिखत–** (½X10=5)

( सद्वृत्ति प्रमाण–पत्र के लिए आचार्य को लिखे गए पत्र को पुनः लिखिए।)

सवित्री नगरम्

तमनार, रायगढ़

तिथि : 16 / 09 / 2023

मान्य महानुभाव!

सदरं नमामि।

सेवायाम् इदं (1) ——— यत् मया (2) ——— एव (3) ——— भवताम् (4) ——— प्रावेशिकी परीक्षा द्वितीयश्रेण्याम् (5) ——— । मम विद्यालयस्य क्रमांकः दशम्याः कक्षायाः (6) ——— इति अभूत्। अहम् पादकन्दुकक्रीडायाः प्रमुखः क्रीडकः आसम्। (7) ——— आचरणम् (8) ——— आसीत्। इदानीम् अहम् कांचन सेवां लब्धुम् यत्नवान् (9) ————।

कृपया (10) ———— मम सद्वृतिप्रमाण–पत्रं मम परिचयेन प्रेषणीयम्।

धन्यवादः!

भवदीयः प्रियः शिष्यः

**भरतः**

| यथाशीघ्रम्, निवेदनम्, विद्यालयात्, मम, अस्मिन्, त्रिंशत्, विशुद्धम्, वर्षे, उत्तीर्णा, अस्मि, |
|---|

**प्र03 मंजूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पंचवाक्येषु चित्रवर्णनं कुरुत–   (1X5=5)**

( मंजूषा में दिए गए शब्दों की सहायता से पाँच वाक्यों में चित्रवर्णन कीजिए )




| |
|---|
| वृक्षस्य, सरणि, अधः, वार्तापत्रम्, पुरुषः, पुष्पाणि, बालकः, बालिकाः, भ्रमतः, भवनानि, युवानौ |

**प्र0 4 अधोलिखितं संवादं मंजूषायां प्रदत्त शब्दैः सहायतया पूरयत–   (1X5=5)**

( निम्नलिखित वार्तालाप को मंजूषा की सहायता से पुनः लिखिए )

**अर्चना** – हे कविते! किं त्वम् (1) ----- विद्यालयं गमिष्यसि ?

**कविता** – नैव श्वः तु शनिवासरः अस्ति अतएव (2) ------- अस्ति।

**दिव्या** – तर्हि अद्य सायंकाले कुत्रचित् (3) ------- चलिष्यामः।

**वन्दना** – अस्तु, अप्पुगृहे चलिष्यामः तत्र 'ऑयेस्टर' इत्यस्तिन् स्थाने सानन्दम् (4) ----- ।

**सुमायरा** – तर्हि शीघ्रं चल तत्परा च (5) ------- ।

| |
|---|
| अवकाशः, भव, भ्रमणाय, श्वः, विहरिष्यामः |

## (खण्ड–ग) अनुप्रयुक्त–व्याकरणम्

**प्र0 5 वर्ण–संयोजनं कुरुत–** ( वर्णों को जोड़कर लिखिए ) **(½X4=2)**

i प् + अ + त् + र् + आ + ण् + इ

ii व् + आ + स् + उ + द् + ए + व् + अ + म्

iii स् + अ + म् + अ + य् + अः

iv ज् + अ + य् + अ + त् + ए

**प्र0 6 अधोलिखित प्रश्नानां उत्तराणि विकल्पेभ्यः चित्वा लिखत–** **(1x5=5)**

i एतेषु वर्णेषु मूर्धन्यः कः वर्णः ?

(क) च् (ख) ञ् (ग) ढ् (घ) म्

ii च्, ख्, ढ्, त् वर्णेषु कः वर्णः तालव्यः अस्ति।

(क) ख् (ख) च् (ग) त् (घ) ढ्

iii इ, छ, ब, श एतेषुवर्णेषु कः वर्णः ओष्ठ्यः अस्ति ?

(क) इ (ख) छ (ग) ब् (घ) श

iv कः दन्त्य वर्णः न अस्ति ?

(क) ध् (ख) लृ (ग) द् (घ) प्

v 'गजः' इति पदे कस्य वर्णस्य उच्चारणस्थानं कण्ठः अस्ति ?

(क) ग् (ख) ज् (ग) ओ (घ) आ

**प्र0 7 अधोलिखितान् समयवाचकान् अंकान् पदेषु लिखत–** **(1X4=4)**

i कृषकः प्रातः (7:00) ————वादने क्षेत्रम् गच्छति।

ii बालकः सायं (4:15) ————वादने खेलितुम् गच्छति।

iii अहम् मध्याह्ने (1:30) ——— वादने भोजनं करोमि।

iv रमेशः रात्रौ (9:45) ——— वादने शयनं करोति।

प्र0 8 मंजूषातः उचितंपदं चित्वा रिक्तस्थानानि शब्दरूपैः पूरयत– (½X10=5)

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | हरिः | (1)—— | हरयः |
| द्वितीया | हरिम् | हरी | (2)—— |
| तृतीया | हरिणा | (3)—— | हरिभिः |
| चतुर्थी | (4)—— | हरिभ्याम् | (5)—— |
| पंचमी | (6)—— | हरिभ्याम् | हरिभ्यः |
| षष्ठी | हरेः | (7)—— | हरीणाम् |
| सप्तमी | (8)—— | हर्योः | (9)—— |
| संबोधन | हे हरे ! | (10)—— | हे हरयः ! |

हरिभ्यः, हर्योः, हरीन्, हरौ, हरिषु, हे हरी!, हरिभ्याम्, हरये, हरेः, हरी,

प्र0 9 मंजूषातः संख्यापदानि चित्वा रिक्तस्थानानि पूरयत– (½X6=3)

(क) ——— ऋतवः भवन्ति।

(ख) मासाः ——— भवन्ति।

(ग) मम शरीरे ——— हस्तौ स्तः।

(घ) फरवरी मासे ——— दिनानि भवन्ति।

(ङ) एकस्मिन् मासे ——— दिवसाः भवन्ति।

(च) तस्मिन् विशाले भवने ——— स्तम्भाः आसन्।

चत्वारिंशत्, षड्, द्वौ, द्वादश, त्रिंशत्, अष्टाविंशति

प्र0 10 अधोलिखितानां पदानां निर्देशानुसारं पदपरिचयं लिखत– (½X4=2)

| | पदानि | मूलशब्दः | लिंगम् | विभक्ति | वचनम् |
|---|---|---|---|---|---|
| i | शिक्षायैः | —— | —— | —— | —— |
| ii | कन्याः | —— | —— | —— | —— |
| iii | नारीणाम् | —— | —— | —— | —— |
| iv | मनोरमया | —— | —— | —— | —— |

प्र0 11 निम्नलिखित पर्यायपदानां समुचितमेलनं कुरुत– (½X8=4)

| | | |
|---|---|---|
| i) | लोकानाम् | (क) सर्वेषाम् |
| ii) | सरितासु | (ख) गृहाणाम् |
| iii) | तरवः | (ग) पुष्पम् |
| iv) | अरण्याणि | (घ) काले |
| v) | कुसुमम् | (ङ) जनानाम् |
| vi) | सकलानाम् | (च) नदीषु |
| vii) | समये | (छ) वनानि |
| viii) | आलयानाम् | (ज) वृक्षाः |

## (खण्ड–घ) पठित–अवबोधनम्

**प्र0 12 अधोलिखितम् गद्याशं ध्यानेन पठित्वा प्रश्नानाम् उत्तराणि लिखत–**

कालक्रमेण रमायाः पिता विपन्नः संजातः। तस्याः पितरौ ज्येष्ठा भगिनी च दुर्भिक्षपीडिताः दिवंगताः। तदनन्तरं रमा स्व–ज्येष्ठः भ्रात्रा सह पद्भ्यां समग्रं भारतम् अभ्रमत्। भ्रमणक्रमे सा कोलकातां प्रप्ता। संस्कतवैदुष्येण सा तत्र 'पण्डिता' 'सरस्वती' चेति उपाधिभ्यां विभूषिता। तत्रैव सा ब्रह्मसमाजेन प्रभाविता वेदाध्ययनम् अकरोत्। पश्चात् सा स्त्रीणां कृते वेदादीनां शास्त्राणां शिक्षायै आन्दोलनं प्रारब्धवती।

1858 तमे ख्रिष्टाब्दे सा विपिनबिहारी दासेन सह बाकीपुर–न्यायालये विवाहम् अकरोत्। सार्धैकवर्षात् अनन्तरं तस्याः पतिः दिवंगतः।

I **एकपदेन उत्तरत–** (केवलं प्रश्नद्वयम्) (½X2=1)

i कः विपन्नः संजातः ?

ii तस्याः पतिः कदा दिवंगतः ?

iii सा कदा कोलकातां प्रप्ता ?

II **पूर्णवाक्येन उत्तरत–** (केवलं प्रश्नद्वयम्) (1X2=2)

i रमाबाई केन सह विवाहम् अकरोत् ?

ii केन प्रभाविता सा वेदाध्ययनम् अकरोत् ?

iii 'पण्डिता' 'सरस्वती' इति उपाधिभ्यां का विभूषिता ?

**III** **निर्देशानुसारम् लिखत–** (केवलं प्रश्नद्वयम्) **(1X2=2)**

i 'विपन्नः' इति शब्दस्य कः अर्थः ?

(अ) सम्पन्नः (ब) पिता

(स) निर्धन (द) संजातः

ii ब्रह्मसमाजस्य संस्थापकः कः आसीत् ?

(अ) स्वामी विवेकानन्दः (ब) स्वामी दयानन्दः

(स) राजा राममोहन रायः (द) स्वामी आत्मानन्द

iii रमाबाई केषां कृते आन्दोलनं प्रारब्धवती ?

(अ) स्त्रीणाम् (ब) पुरुषाणां

(स) भगिनी (द) भ्राता

**प्र0 13 अधोलिखितं श्लोकम् ध्यानेन पठित्वा प्रश्नानाम् उत्तराणि लिखत–**

सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम्।
प्रियम च नानृतं ब्रूयात् एषः धर्मः सनातनः।।
श्रेष्ठं जनं गुरुं चापि मातरं पितरं तथा।
मनसा कर्मणा वाचा सेवेत सततं सदा।।

**I** **एकपदेन उत्तरत–** (केवलं प्रश्नद्वयम्) **(½X2=1)**

i किम् ब्रूयात् ?

ii किम् न ब्रूयात् ?

iii सत्यम् कथं न ब्रूयात् ?

**II** **पूर्णवाक्येन उत्तरत–** (केवलं प्रश्नद्वयम्) **(1X2=2)**

i मनसा कम्–कम् सेवेत ?

ii सनातन धर्मः किम् ?

iii मातरं पितरं च कथं सेवेत ?

**III** **उचितम् उत्तरं चित्वा लिखत–** (केवलं प्रश्नद्वयम्) **(1X2=2)**

i 'सर्वदा' इति पदस्य पर्यायपदम् किम् ?

(अ) सदा (ब) न

(स) प्रियं (द) च

ii 'असत्यम्' इत्यर्थे श्लोके किम् पदम् प्रयुक्तम् ?

(अ) सत्यम् (ब) सनातन

(स) तथा (द) अनृतं

iii 'अप्रियम्' इति पदस्य विलोमपदम् श्लोके किम् प्रयुक्तम् ?

(अ) असत्यम् (ब) प्रियम्

(स) वाचा (द) जनम्

**प्र0 14 अधोलिखितं नाट्यांशं ध्यानेन पठित्वा प्रश्नानाम् उत्तराणि लिखत–**

**धीवराः** – "वयं श्वः मत्स्यकूर्मादीन् मारयिष्यामः।"

**कूर्मः** – "मित्रे! किं युवाभ्यां धीवराणां वार्ता श्रुता ? अधुना किम् अहं करोमि ?"

**हंसौ** – "प्रातः यद् उचितम् तत्कर्तव्यम्।"

**कूर्मः** – "मवैम्। तद् यथाऽहम् अन्यं ह्रदं गच्छामि तथा कुरुतम्।"

**हंसौ** – "आवां किं करवाव ?

**कूर्मः** – "अहं युवाभ्यां सह आकाशमार्गेण अन्यत्र गन्तुम् इच्छामि।"

**हंसौ** – "अत्र कः उपाय ?"

**कच्छपः**– "युवां काष्ठदण्डम् एकं चंच्वा धारयताम्। अहं काष्ठदण्डमध्ये अवलम्ब्य युवयोः पक्षबलेन सुखेन गमिष्यामि।"

**हंसौ** – "सम्भवति एषः उपाय। किन्तु अत्र एकः अपायोऽपि वर्तते।"

I **एकपदेन उत्तरत**– (केवलं प्रश्नद्वयम्) **(½X2=1)**

i धीवराः कान् मारयिष्यन्ति ?

ii कच्छपः कुत्र गन्तुम् इच्छति ?

iii सरस्तीरे के आगच्छन् ?

II **पूर्णवाक्येन उत्तरत**– (केवलं प्रश्नद्वयम्) **(1X2=2)**

i कूर्म केन मार्गेण अन्यत्र गन्तुम् इच्छति ?

ii कच्छपः कम् उपायं वदति ?

iii हंसौ किम् अवदताम् ?

**III उचितम् उत्तरं चित्वा लिखत–** (केवलं प्रश्नद्वयम्) **(1X2=2)**

**i** "वयं श्वः मत्स्यकूर्मादीन् मारयिष्यामः" वाक्येऽस्मिन् क्रिया पदम् किम् ?

(अ) वयम् (ब) मारयिष्यामः

(स) मत्स्यकूर्मादीन् (द) श्वः

**ii** "सरः" इत्यर्थे संवादे किं पदं प्रयुक्तम् ?

(अ) ह्रदम् (ब) उपाय

(स) अन्यम् (द) अत्र

**iii** "मैवम्" इति पदस्य सन्धि–विच्छेदं किम् ?

(अ) मै + एवम् (ब) मा + वम्

(स) मा + एवम् (द) मे + वम्

**प्र0 15 स्थूलपदानि आधृत्य विकल्पेभ्यः प्रश्ननिर्माणं कुरुत–** (केवलं प्रश्नचतुष्टयम्)

( निम्नलिखित वाक्यों को उचित विकल्प से प्रश्ननिर्माण कीजिए ) **(1X4=4)**

**i** व्यवहारे **मृदुता** श्रेयसी।

(अ) कम् (ब) किम्

(स) का (द) काभ्याम्

**ii** **स्त्रियः** शिक्षां लभन्ते स्म।

(अ) काः (ब) कस्याः

(स) किम् (द) कम्

**iii** **श्रीकण्ठस्य** पिता समृद्धः आसीत्।

(अ) कस्मिन् (ब) कदा

(स) कस्याः (द) कस्य

**iv** कच्छपः **अन्यत्र** गन्तुम् इच्छति।

(अ) केन (ब) कुत्र

(स) कान् (द) कया

**v** **सर्वदा** व्यवहारे ऋजुता विधेया।

(अ) कदा (ब) कस्य

(स) का (द) कयोः

प्र0 16 अधोलिखितानि वाक्यानि घटनाक्रमानुसारं पुनः लिखत– (½x8=4)

( निम्नलिखित घटनाक्रम को समुचितक्रम में पुनः लिखिए )

i कूर्मः हंसयोः सहायतया आकाशमार्गेण अगच्छत्।

ii गोपालकाः अकथयन्– वयं पतितं कूर्मं खादिष्यामः।

iii कूर्मः हंसौ च एकस्मिन् सरसि निवसन्ति स्म।

iv केचित् धीवराः सरस्तीरे आगच्छत्।

v कूर्मः अन्यत्र गन्तुम् इच्छति स्म।

vi लम्बमानं कूर्मं दृष्ट्वा गोपालकाः अधावन्।

vii कूर्मः आकाशात् पतितः गोपालकैः मारितश्च।

viii 'वयं श्वः मत्स्यकूर्मादीन् मारयिष्यामः' इति धीवराः अकथयन्।

प्र0 17 कोष्ठकात् क्रियापदानि चित्वा रिक्तस्थानानि पूरयत– (1x5=5)

( कोष्ठक से उचितपद चुनकर वाक्यपूर्ति कीजिए )

i व्यवहारे सर्वदा औदार्यं ———। ( स्यात् / सेवेत )

ii अनृतं प्रियं च न ————। ( ब्रूयात् / स्यात् )

iii मनसा मातरं पितरं च ———। ( ब्रूयात् / सेवेत )

iv सत्यम् प्रियं च ————। ( स्यात् / ब्रूयात् )

v वाचा गुरुम् ————। ( ब्रूयात् / सेवेत )

प्र0 18 विलोम पदानि मेलयत– ( विलोमपदों का उचित मिलान करो ) (½x4=2)

| | |
|---|---|
| (अ) अभिनवः | (क) दुर्लभः |
| (ब) प्रभूतम् | (ख) अमंगलम् |
| (स) अमंगलम् | (ग) पुरातनः |
| (द) सुलभः | (घ) अल्पम् |

———00———